कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/



क.२१

शत्रुः५ नृपः१ पीडैः१
तुल्यबलविरोधं२
सुदक्षता३ हितं५

समर्थोभवना४ प्रवर्तनाय३ क्षालितेव२ वर्द्धमानः४
आख्यातोप्रवर्द्धमानो५ यागाय५ पार्थो युधिष्ठिरः४ शिशुपालः५

नियाम्यस्मी॥ तौ रुरुहे केसरिकांतत्रिकूटशिखरोपमा॥५॥ गुरुद्वयाय गुर्वोरुभयोरथ कार्ययोः॥ हरिर्वि रु१
प्रतिषेधं तमाचचक्षे विचक्षणः॥६॥ द्योतितांतःसभैः कुंदकुड्मलाग्रदतः स्मितैः॥ स्नपितेवाभवत्तस्य शु
द्धवर्णा सरस्वती॥७॥ भवद्गिरामवसरप्रदानाय वचांसि नः॥ पूर्वरंगः प्रसंगाय नाटकीयस्य वस्तुनः॥८॥
करदीकृतभूपालो भ्रातृभिर्जित्वरैर्दिशां॥ विनाप्यस्मदलंभूष्णुरिज्यायै तपसः सुतः॥९॥ उत्तिष्ठमान
स्तु परो नोपेक्ष्यः पथ्यमिच्छता॥ समौ हि शिष्टैराम्नातौ वर्त्स्यंतावामयः स च॥१०॥ न दूये सात्वतीसूनुर्य
दो न्मह्यमपराध्यति॥ यत्तु दंदह्यते लोकमतो दुःखाकरोति मां॥११॥ मम तावन्मतमिदं श्रूयतामंग वामपि॥
ज्ञातसारोपि खल्वेकः संदिग्धे कार्यवस्तुनि॥१२॥ यावदर्थपदां वाचमेवमादाय माधवः॥ विरराम महीं मे२
यांसः प्रकृत्या मितभाषिणः॥१३॥ ततः सपत्नापनयस्मरणानुशयस्फुरा॥ ओष्ठेन रामो रामोष्ठबिं
बचुंबनचुंचुना॥१४॥ विवक्षितामर्थविदस्तत्क्षणप्रतिसंहृतां॥ प्रापयन्पवनव्याधेर्गिरमुत्तरपक्ष

निषेधे यत्र४ कर्तव्यार्थे संदेहप्राप्ते२ परिमितानि अक्षराणि३ जगत्पते५ तूष्णीं बभूव२
उत्तमाः२ दुष्यति४ अपकारस्य२ पश्चात्तापेन२ उद्धवः३ उद्धवस्य२ सिद्धांतता१
चित्तः चंचलः२ वक्तुमिच्छां२ निरुद्धां१

Acc. NO. ~~705~~ M-1566
Title – शिशुपालवधम्
Author – माघ
Date – A.D. 1668.
subject – काव्य (Poetry)
folio – 97 avalible. (first 6 folio are missing)
Xerox – 195

KKSU LIBRARY
RAMTEK
441 106
M-1566
Dist. Nagpur

Checked 2012

माघ२

ध्यानयन्२ उत्तरीयस्य४ धूम्रांकुर्वन्४ बिंदून्३ आलिंगने१
संसर्गः५ स्फुरितानि२

तां॥१५॥ घूर्णयन्मदिरास्वादमदपाटलितद्युती॥ रेवतीवदनोच्छिष्टपरितंपुटे दृशौ॥१६॥ आश्लेषलो प१
लुपवधूस्तनकार्कश्यसाक्षिणीं॥ म्लापयन्नभिमानोष्णैर्वनमालां मुखानिलैः॥१७॥ दधत्संध्यारुणव्यो
मस्फुरत्तारानुकारिणीः॥ द्विषद्द्वेषोपरक्तांगसंगिनीः स्वेदविप्रुषः॥१८॥ प्रोल्लसत्कुंडलप्रोतपद्मरा
गदलत्विषा॥ कृष्णोत्तरासंगरुचं विदधच्चौतपल्लवीं॥१९॥ ककुद्मिकन्यावक्त्रांतर्वासलब्धाधि
वासया॥ मुखामोदं मदिरया कृतानुव्याधमुद्वमन्॥२०॥ जगाद वदनच्छद्मपद्मपर्यंतपातिनः॥
नयन्मधुलिहः श्वैत्यमुदग्रदशनांशुभिः॥२१॥ ॥कुलकं॥ ॥यद्वासुदेवेनादीनमनादीनवमी
॥७॥ रितं॥ वचसस्तस्य सपदि क्रियाकेवलमुत्तरं॥२२॥ नैतल्लघ्वपि भूयस्या वचो वाचातिशय्यते॥ इं ॥७॥
धनौघधगप्यग्निस्त्विषा नात्येति पूषणं॥२३॥ विसेधिवचस्तोम्नकोवाणीशानपिकुर्वते॥ नेडानण्ण न२
नुलोमार्थान्निवाचः कृतिनां गिरः॥२४॥ संक्षिप्तस्याप्यतोस्यैव वाक्यस्यार्थगरीयसः॥ विस्तुस्तर

अनुकूलः१ वादः१ धावल्यं४ नतिक्रमति२ सिद्धांतं३ अल्पाक्षरस्य२ निर्दोषं५ मंदान्२
कुशलानां१ ज्ञेतुं न शक्यते४

मंदबुद्धयः२ ञाप्यसमाः१ संधिः विग्रहः यानं आसनं द्वैधं आश्रयः६ प्रभुः मंत्रः उत्साहः१ लक्ष्यात्स्खलितः२ आख्यातुं१
विचारः४ समर्थाः२ नावलोकितं२ अंगानुल्यं५ प्रभावसिद्धिमंत्रउत्साहः२
कवचादिभिर्गुप्तेः४ बौद्धानां२ सायस्थानं बुद्धिभ्यार्विगोनातिवेदनां१

तरावाचोऽष्यनृतीन्नबंतुमे॥२५॥ षड्गुणाः शक्तयस्तिस्रः सिद्धयश्चोदयास्त्रयः॥ ग्रंथानधीत्यव्याकर्तुमि
ति दुर्मेधसोऽप्यलं॥२६॥ अनिर्लोडितकार्यस्य वाग्जालं वाग्मिनो वृथा॥ निमित्तादपराद्धेषोर्धानुष्कस्येव व
ल्गितं॥२७॥ सर्वकार्यशरीरेषु मुक्त्वांगस्कंधपंचकं॥ सौगतानामिवात्मान्यो नास्ति मंत्रो महीभृतां॥२८॥
मंत्रो योध इवाधीरः सर्वांगैः संवृतैरपि॥ चिरंन्न सहते स्थातुं परेभ्योच्छेदशंकया॥२९॥ आत्मोदयः
हानिः५ परज्यानिर्द्वयं नीतिरितीयती॥ तदूरीकृत्य कृतिभिर्वाचस्पत्यं प्रतन्यते॥३०॥ तृप्तियोगः परेणापि शक्रुतेन५
न महिम्नो महात्मनां॥ पूर्णश्चंद्रोदयाकांक्षी दृष्टांतोऽत्र महार्णवः॥३१॥ सम्मूलघातमघ्नंतः परान्नो हत्या४
द्यंति मानिनः॥ प्रध्वंसितांधतमसस्तत्रोदाहरणं रविः॥३२॥ संपदा सुस्थितंमन्यो भवति स्वल्पयापि यः॥ कृतकृत्यो विधिर्मन्ये न वर्द्धयति तस्य तां॥३३॥ विपक्षमखिलीकृत्य प्रतिष्ठा खलु दुर्लभा॥ अ
नीत्वा पंकतां धूलीमुदकं नावतिष्ठते॥३४॥ ध्रियते यावदेकोऽपि रिपुस्तावत्कुतः सुखं॥ पुरः क्लिश्नाति
ऐश्वर्येण४ दैवं२ एनावता५ अवतिष्ठते१ आत्मानं समाधानं३ नहंति४ पाऽपीत१
उच्छिन्नमहत्ता२ पिस्थमाना३

3

नरकासुरं४ राहुः१ उपद्रुतः३ शिशुपालः२ कार्यः२ अनर्थीयसमर्थाः५ इष्टव्यं२
मघ मित्रामित्रयोः३ रुक्मवान्४ अस्तंगतः४ सानुं४ उपद्रुतः५ उच्चार्य४
शेषस्य५

हि१ तिसोमं सैंहिकेयोऽसुरद्विषां॥३५॥ सखा गरीयान् शत्रुश्च कृत्रिमस्तौ हि कार्यतः॥ स्यातामित्रौ मित्रे
च सहजप्राकृतावपि॥३६॥ उपकर्त्रारिणा संधिर्न मित्रेणापकारिणा॥ उपकारापकारौ हि लक्ष्यं लक्ष
णमेतयोः॥३७॥ त्वया विप्रकृतश्चैद्यो रुक्मिणीं हरता हरे॥ बद्धमूलस्य मूलं हि महद्वैरतरोः स्त्रियः॥३८॥
त्वयि भौमं गते जेतुमरौत्सीत्स पुरीमिमां॥ प्रोषितार्यमणं मेरोरंधकारस्तटीमिव॥३९॥ आलप्या
लमिदं बभ्रोर्यत्स दारानपाहरत्॥ कथापि खलु पापानामलमश्रेयसे यतः॥४०॥ विराद्ध एवं भ
वता विराद्धा बहुधा च नः॥ निर्वर्त्यतेऽरिः क्रियया स श्रुतश्रवसः सुतः॥४१॥ विधाय वैरं सामर्षे
॥८॥ नरोऽरौ य उदासते॥ प्रक्षिप्योदर्चिषं कक्षे शेरते तेऽभिमारुतं॥४२॥ मनागनभ्यावृत्त्या वा कामं क्षा ॥८॥
म्यतु यः क्षमी॥ क्रियासमभिहारेण विराध्यंतं क्षमेत कः॥४३॥ अन्यदा भूषणं पुंसः क्षमा लज्जेव यो
षितः॥ पराक्रमः परिभवे वैयात्यं सुरतेष्विव॥४४॥ मा जीवन्यः परावज्ञादुःखदग्धोऽपि जीवति॥ तस्या

उपेक्षंते३ वर्तते४ अपकारेण४ अल्पअनल्पत्वेन३
पुनःपौन्येन२ स्तपो२ अपकुर्वंतं२ अपरिभवे२ सुरघातिरिक्तकाळे२
संग्रामे१ वैलिर्लज्जत्वं१ १

अनुसन्निः२ राहुः४ दघांतः५ गंभीरता३ लाघवलाः५ वीरे२
दुर्बलानां५

जननिरेवास्तु जननीक्लेशकारिणः ॥४५॥ पादाहतं यदुत्थाय मूर्द्धानमधिरोहति ॥ स्वस्थादेवापमा
नेपि देहिनस्तद्वरं रजः ॥४६॥ असंपादयतः कंचिदर्थं जातिक्रियागुणैः ॥ यदृच्छाशब्दवत्पुंसः संज्ञायै
जन्म केवलं ॥४७॥ तुंगत्वमितरा नाद्रौ नेदं सिंधावगाधता ॥ अलंघनीयताहेतुरुभयं तन्मनस्विनि ॥
॥४८॥ तुल्येपराधे स्वर्भानुर्भानुमंतं चिरेण यत् ॥ हिमांशुमाशु ग्रसते तन्म्रदिम्नः स्फुटं फलं ॥४९॥
स्वयं प्रणमतेल्पेपि परवायावुपेयुषि ॥ निदर्शनमसाराणां लघुर्बहुतृणं नरः ॥५०॥ तेजस्विमध्ये ते
जस्वि दवीयानपि गण्यते ॥ पंचमः पंचतपसस्तपनो जातवेदसां ॥५१॥ अकृत्वा हेलया पादमुच्चै
र्मूर्द्धसु विद्विषां ॥ कथंकारमनालंबा कीर्तिर्द्यामधिरोहति ॥५२॥ अंकाधिरोपितमृगश्चंद्रमा मृ
गलांछनः ॥ केसरी निष्ठुरक्षिप्तमृगयूथो मृगाधिपः ॥५३॥ चतुर्थोपायसाध्ये तु रिपौ सांत्वमपक्रिया
॥ स्वेद्यमामज्वरं प्राज्ञः कोंभसा परिषिंचति ॥५४॥ सामवादाः सकोपस्य तस्य प्रत्युत दीपकाः ॥ प्रतप्तस्येव

अति दूरस्थोपि४ हतः२ शिरा धारा३ दंडेन२ अग्निधाप४
वैपरित्येन२

५

उद्धवास्य२ चिह्नं१ पक्षी॥१
संपादनाय१ काले अन्यप्रयोगात्१ पाशोचक्रः२ अनुपुंजाने२
रकोदैत्य५ उरात्सर्वंध५
वृद्धाः सामर्थ्याधिके२ महत्त्वस्य४ निवृत्ति१ लुःखदुःखानुभवे४
सांख्याः तैः४

माघ२

सहसा सर्पिषस्तोयबिंदवः॥५५॥ गुणानामायथातथ्यादर्थं विप्लावयंति ये॥ अमात्यव्यंजना राज्ञां दू-
ष्यास्ते शत्रुसंज्ञिनाः॥५६॥ स्वशक्त्युपचये केचित्परस्य व्यसनेऽपरे॥ यानमाहुरुदासीनं त्वामुत्थापयति
द्वयं॥५७॥ लिलंघयिष्यतो लोकानलंघ्यानलघीयसः॥ यादवांभोनिधीन् रुंधे वेलेव भवतः क्षमा॥५८॥
विजयस्त्वयि सेनायाः साक्षिमात्रेऽपदिश्यतां॥ फलभाजि समीक्ष्योक्ते बुद्धेर्भोग इवात्मनि॥५९॥ हते हि-
डंबरिपुणा राज्ञि द्वैमातुरे युधि॥ चिरस्य मित्रव्यसनी सुदमो दमघोषजः॥६०॥ नीतिरापदि यद्गम्यः परस्त- ॥७॥
न्मानिनो ह्रिये॥ विधुर्विधुंतुदस्येव पूर्णस्तस्योत्सवाय सः॥६१॥ अन्यदुच्छृंखलं सत्वमन्यच्छास्त्रनियंत्रि-
तं॥ सामानाधिकरण्यं हि तेजस्तिमिरयोः कुतः॥६२॥ इंद्रप्रस्थगमस्तावत्कारि मा संतु चेदयः॥ आस्मा-
॥७॥ कदंतिसान्निध्याद्वामनीभूतभूरुहे॥६३॥ निरुद्धवीवधासारप्रसारा गा इव व्रजे॥ उपरुंधंतु दाशा-
र्हाः पुरीं माहिष्मतीं द्विषः॥६४॥ यजतां पांडवः स्वर्गमावत्विंद्रस्तपत्विनः॥ वयं हनाम द्विषतः सर्वः स्वा-

अनर्गलबलं४ मन्वादिनाविधिना तं४
सुतरां५ स्वबुभुक्षां५
विलंघतां४ सर्वः१ गोष्ठे२ दाशाः२ यादवाः२
एकाश्रयत्वं२ राज्ञोः४
शाखाविलग्नास्त्ववरुद्धतीः इसाः संतु२
अन्यादिप्राप्तिः नस्य सुहृद्बलं तत्काशादिवेशाः२
सारधाहरणस्य च नर्गतां निर्गम प्रवेशौ२

6



बळरामस्य३ गिरः३ वक्तुं२ पत्रेण५ चित्रलिखिताः२ वाणीनां२ स्ववता१ अर्थगौरवं३
अभिज्ञं३ श्रयेद्द्विजं ज्ञानेन२ उद्धवाय३ प्रतिवचनं ददन्तिव२ अपुनं
नीतिशास्त्रानुसारिणी४ उद्धवेन४ अकं५

र्थं समीहते॥ ध्व्याप्येत्रो नां विधुतां संपक्वसंपकोदर्करोचिषां॥ शास्त्रैर्द्दीप्तिषच्छिरच्छेदप्रोच्छलच्छोणितोक्षितैः॥
॥६६॥ इति संरंभिणो वाणीर्बलस्यालेख्यदेवताः॥ सभाभित्तिप्रतिध्वानैर्भयादन्ववदन्निव॥६७॥ निश
म्य ताः शेषगवीरभिधातुमधोक्षजः॥ शिष्याय बृहतां पत्युः प्रस्तावमादिशद्दृशा॥६८॥ भारतीमा
हितभरामथानुद्धतमुद्धवः॥ तथ्यामुतथ्यानुजवज्जगादाग्रे गदाग्रजं॥६९॥ संप्रत्यसांप्रतं वक्तुमु ऊ छं४
क्ते मुशलपाणिना॥ निर्द्धारितेर्थे लेखेन खलूक्त्वा खलु वाचिकं॥७०॥ तथापि यन्मय्यपि ते गुरुरित्यस्ति गौ
रवं॥ तत्प्रयोजककर्तृत्वमुपैति मम जल्पतः॥७१॥ वर्णैः कतिपयैरेव ग्रथितस्य स्वरैरिव॥ अनंता वा
ङ्मयस्याहो गेयस्येव विचित्रता॥७२॥ बह्वपि स्वेच्छया कामं प्रकीर्णमभिधीयते॥ अनुज्झितार्थसंबं
धः प्रबंधो दुरुदाहरः॥७३॥ म्रदीयसीमपि घनामनल्पगुणकल्पितां॥ विस्तारयंति कुशलाश्चित्रां
वाचं पटीमिव॥७४॥ विशेषविदुषः शास्त्रं यत्तवोद्ग्राह्यते पुरः॥ हेतुः परिचयस्थैर्ये वक्तुर्गुणनिकैव सा॥७५॥
प्रज्ञोत्साहावतः स्वामी यतेताधातुमात्मनि॥ तौ हि मूलमुदेष्यंत्या जिगीषोरात्मसंपदः॥७६॥ सोपधा

प्रेरकत्वं५ भवेत्१ संपादयितुं१ अर्थपुर्वं२ परिमितैः५ अभ्यासदार्ढ्ये२ पठनाः३
शद्दआ काव्यस्य४ वर्तनीयाः१ आमेडनं२

सौध२ सविसोधां१ वर्षकृत्कुर्वंति२ लघ्वायां१ मंदेन२ अन्वयन्विताः२ प्राप्तस्य२ प्राज्ञाः१
असावधानस्य४ प्रगमार्तो४ बुद्धिमंतः३ निरस्तः४ व्याधः४ स्वपरराष्ट्रचिंतने-राज्यमोषधप्रयोगं५
सम्यगुपायैः-दैवनाध्यानैः५

नांघ्रियंधीरास्त्येयसीखंद्वयंतिये ॥ तत्रानिशंनिषण्णास्तेर्जनतेजानुनभ्रमं ॥७७॥ सशांतिशारवत्तौ
क्षणौस्तोकमंनार्विशंतिच ॥ बहुस्यशापिस्तुल्लेनैस्त्रीयतेबहिरश्मवत् ॥७८॥ आरंभंतेल्पमेवाज्ञाः का
मंव्यग्राभवंतिच ॥ महारंभाः कृतधियस्तिष्ठंतिचानिराकुलाः ॥७९॥ उपायमास्थितस्यापिनश्यंत्य
र्थाः प्रमाद्यतः ॥ हंतिनोपशयस्थोपिशयालुर्मृगयुर्मृगान् ॥८०॥ उदेतुमत्यजन्नीहाराज्ञस्तुहा
रशास्वपि ॥ जिगीषुरेकोदिनकृदादित्येष्विवकल्पते ॥८१॥ तंत्रावापविदायोगैर्मंडलान्यधितिष्ठ
ता ॥ सुनिग्रहानरेंद्रेणफणींद्राइवशत्रवः ॥ ८२॥ करप्रचेयामुत्तुंगः प्रभुशक्तिंप्रथीयसीं ॥ प्रज्ञा
॥१०॥ बलबृहन्मूलः फलत्युत्साहपादपः ॥८३॥ बुद्धिशस्त्रः प्रकृत्यंगोघनसंवृतिकंचुकः ॥ चारेक्षणो ॥१०॥
दूतमुखः पुरुषः कोपिपार्थिवः ॥८४॥ तेजः क्षमावानैकांतः कालज्ञस्यमहीपतेः ॥ नैकमोजः प्रसादो
वारसभावविदः कवेः ॥८५॥ कृतापराधोपिपरैरनाविष्कृतविक्रियः ॥ सोअध्यः कुरुतेकोपंप्राप्तेका

विषवेधेन४ पराक्रमरूप३ अपचारः१ बुद्धिनावृद्धिनृपा-हस्तग्राह्यां४
रश्मैतंसायं२ नियमः२ प्रज्ञाः३ दुर्भेदामंत्रगुप्तिवे३

8

रोगः१ देवं२ आछिन्नं१ अकाशस्य५ प्रभवति१ प्रयोत्साहाधिकत्वात् अनल्पत्वात्३
निर्वेदायः२ चक्षु[illegible]४ पोषणता४ विजिगीषोः३ किंचिदकुर्वाणस्य [illegible]पकत्वरत्वा२
[illegible]क्रियाः१

लेगदोषयथा॥८६॥ मृदुर्व्यवहितं तेजो भोक्तुमर्थान्न कल्पते। प्रदीप्तस्नेहमादत्ते दशयांतरस्थया॥८७॥
नालंबते दैष्टिकतां न निषीदति पौरुषे। शब्दार्थौ सत्कविरिव द्वयं विद्वानपेक्षते॥८८॥ स्थायिनोर्थे प्रव
र्तंते भावाः संचारिणो यथा। रसस्यैकस्य भूयांसस्तथा नेतुर्महीभृतः॥८९॥ अनल्पत्वात्प्रधानत्वाद्वं
शस्यैवेतरे स्वराः॥ विजिगीषोर्नृपतयः प्रयांति परिवारितां॥९०॥ अप्यनारभमाणस्य विभोरुत्पादि
ताः परे। व्रजंति गुणानर्थाः शब्दा इव विलासिनः॥९१॥ ता५ यानव्यपार्ष्णिग्राहादिमालायामधिकद्युतिः। ए
कार्थतंतुप्रोतायां नायको नायकायते॥९२॥ षाड्गुण्यमनुपयुंजीत शक्त्यपेक्षं रसायनं। भवंत्यस्यैवमं
गानि स्थास्नूनि बलवंति च॥९३॥ स्थाने शमवतां शक्त्या व्यायामे वृद्धिरंगिनां। अयथाबलमारंभो
निदानं क्षयसंपदः॥९४॥ न दौशितारं चेदीनां न्ववांस्तमवमंस्त मा। निहंत्यरीनेकपदे य उदात्तः स्व
रानिव॥९५॥ मा वेदि यदसावेको जेतव्यश्चेदिराडिति। अरोयक्ष्मेव रोगाणां समूहः समहीभुजां॥९६॥

हीनः२ स्वयं उत्कर्षेणिवर्तते४ अग्रगामी पृष्ठानुगामी५ इवास्थानं औषधं च४
शासितारं२ अशक्यविषये३ व्यापारे३ क्षयरोग१

मौलिलाभः४ प्रज्वलयिता२ बाणासुरःसंधिं१ भेदः२ बाणाये१२

मोघ२ अभियातं५ सहायौभविष्यंति५ प्रकृष्टदोषं२ अल्पोपि३ युधिष्ठिरस्य५

संपादितफलस्तेनसपक्षःपरच्छेदकः॥कार्मुकेणेवगुणिनाबाणैःसंधानमेष्यति॥९७॥येचान्येकाल
यवनशाल्मरुक्मिद्रुमादयः॥तमःस्वभावास्तेप्येनंप्रदोषमनुगामिनः॥९८॥उपजापःकृतस्तेनतानाको
पवतस्त्वयि॥आशुदीपयितोल्पोपिसाग्नीनेधानिवानिलः॥९९॥बृहत्सहायःकार्यांतंक्षोदीयानपि
गच्छति॥संभूयांभोधिमभ्येतिमहानद्यानगापगा॥१००॥तस्यमित्राण्यमित्रास्तेयेचयेचोभयेनृपाः॥अभि
युक्तंत्वयैनंतेगंतारस्त्वामतःपरे॥१॥मखविघ्नायसकलमित्थमुत्थाप्यराजकं॥हंतजातमजातारेः ॥२१॥
प्रथमेनत्वयारिणा॥२॥संभाव्यत्वामतिभरक्षमस्कंधंसुबांधवः॥सहायमध्वरधुरांधर्मराजोविव नर२
॥११॥ क्षते॥३॥महात्मानोनुगृह्णंतिभजमानान्रिपूनपि॥सपत्नीःप्रापयंत्यब्धिंसिंधवोनगनिम्नगाः॥४॥वि
रांदपिबलात्कारोबलिनःसिद्धयेरिषु॥छंदानुवर्तिनोदुस्साध्याःसुहृदोविमनीकृताः॥५॥मन्यसेरि
वधःक्षेपान्मातयेनाकिनामिति॥पुरोडाशभुजामिष्टमिष्टंकर्तुमलंतरां॥६॥अमृतेनामयसंतो वेदुमिच्छते

विजयः२ चित्तानुरोधेन२ यागः१ वैमनस्यंप्रापिताः२

परतापीन३ पश्याये२ मंथितस्य१ मर्मच्छेदिनी२ अपराधाः२

स्वरूपं५ प्रतिपालनीयं२ मंथरदंडेन१ प्रतिज्ञातं२ शब्दपुराणाः४ व्याकरणविद्येव५

अभिमानेन ततं२ न नीतिशास्त्रविरुद्धः५

मंत्रजिह्वेषु जुह्वति॥ शास्त्रैव मंदरक्षस्ते क्षान्तितां तोषि वर्णना॥७॥ सहि ष्णोः शतमागांसि सह्नोस्तेइ
तिपत्त्वया॥ प्रतीक्ष्यं तत्प्रतीक्षायै पञ्चषस्ते प्रतिश्रुतं॥८॥ तीक्ष्णा नारुंतुदा बुद्धिः कर्म शांतं प्रतापवत्॥
नोपतापि मनः सोष्म वागेका वाग्मिनः सतः॥९॥ स्वयं कृतप्रसादस्य तस्याह्नो भानुमानिव॥ समया
वधिमप्राप्य नांताया लंभवानपि॥१०॥ कृत्वा कृत्यविदस्तीर्थैरंतः प्रणिधयः पदं॥ विदां कुर्वंतु मह
तस्तलं विद्विषदंभसः॥११॥ अनुत्सूत्रपदन्यासा सद्वृत्तिः सन्निबंधना॥ शब्दविद्येव नो भाति राजनी
तिरपस्पशा॥१२॥ अज्ञातदोषैर्दोषज्ञैरुद्दूष्योभयवेतनैः॥ भेद्याः शत्रोरभिव्यक्तशासनैः सामवायि
काः॥१३॥ उपेयिवांसि कर्तारः पुरा जातशात्रवीं॥ राजन्यकान्युपायज्ञैरेकार्थानि चरैस्तव॥१४॥
स्वविशेषसुते पांडोर्न किंचन वनीतनाति॥ वैरायितारस्तरलाः स्वयमत्सरिणः परे॥१५॥ यदहास्मवि
दीपक्षमध्ये स्नेहसंध्यङ्गियुञ्जोपि च ऋतुजः स्तु॥ बलिपुष्टकुलादिवान्यपुष्टैः पृथगस्मादचिरेणानो

विर

चरेणाधिना४ प्राप्तवंतिकरिष्यंति२ कर्तारः२ चपलाः२ सचिवादयः४ विपक्षमध्यात्२ भविष्ये१

चैद्येनसह ऐश्वर्यगताः१

11

माघ

पतंगतां गंतु२ हरेः कृतानंदा१ विवेचितार्थाः१ सहायः१ नीतिमार्गानुसारिणीं१ निरतः५ निवार्य मैत्री१
बलवद्रिपुकृतस्य१ आलनाद्युल्लिखितवान्१

विनीतैः॥११६॥ सहजचापलदोषसमुद्धतश्चलितदुर्बलपक्षपरिग्रहः॥ तव दुरासदवीर्यविभावसौश
लभतां लभतामसुहृज्जनः॥११७॥ इति विशकलितार्थामौद्धवीं वाचमेनामनुगतनयमार्गामर्गलां दु
र्नयस्य॥ जनितमुदमुदस्थादुच्चकैरुच्छ्रितोरःस्थलनियतनिषण्णश्रीकृतां शुश्रुवान्सः॥११८॥ छ॥
॥ इति श्रीशिशुपालवधे महाकाव्ये श्र्यंके कवि श्रीमाघकृतौ मंत्राभिधानो नाम द्वितीयः सर्गः॥
॥२॥ श्री॥ कौबेरदिग्भागमपास्य मार्गमागस्त्यमुष्णांशुरिवावतीर्णः॥ अपेतयुद्धाभिनिवेशसौ
म्यो हरिर्हरिप्रस्थमथ प्रतस्थे॥१॥ जगत्पवित्रैरपि तं न पादैः स्प्रष्टुं जगत्पूज्यमयुज्यतार्कः॥ या
॥१२॥ तो बृहत्पार्वणचंद्रचारु तस्यातपत्रं बिभरांबभूवे॥२॥ मृणालसूत्रामलमंतरेण स्थितश्चलच्चाम ॥१३॥
रयोर्द्वयेन॥ भेजेऽभितः पातुकसिद्धसिंधोरभूतपूर्वां रुचमंबुराशेः॥३॥ चित्राभिरस्योपरिमौ
लिभाजां कांतिर्मणीनामनणीयसीभिः॥ अनेकधातुच्छुरिताश्मराशेर्गोवर्धनस्याकृतिरन्वका

इंद्रप्रस्थं४ ऊनयत१ महीयसीभिः१ दीप्तिणां५ मिश्रिताः१ मध्ये२ गाहतः४ अनुकृता१
प्रतिरात्ता२

2

आमोचनं१ विदरणात्४ सिक्तैः४ खचितानि१ प्रक्षिप्ताभ्यं३ क्षिप्तैः३ अभ्यस्तं१ दिदीपे२ मालिका२
मंथराद्रेः शिखरस्य अग्रे संघर्षणानेव राणो लुखनेन२ बहुलतरेण२ समूहेन२
निक्षिप्ते५

रि॥४॥ तस्योल्लसत्कांचनकुंडलाग्रप्रत्युप्तगारुत्मतरत्नभासा॥ अवापबाल्योचितनीलकंठपिच्छावचूडा
कलनामिवोरः॥५॥ तमंगदे मंदरकूटकोटिव्याघट्टनोत्तेजनया मणीनां॥ बंहीयसा दीप्तिवितानकेन च
कासयामासतुरुल्लसंतौ॥६॥ निसर्गरक्तैर्वलयावनद्धपद्माश्मरश्मिच्छुरितैर्नखाग्रैः॥ यस्यानतोचापि
सुरारिवक्षो विक्षोभजासृक्स्नपितैरिवासौ॥७॥ उभौ यदि व्योम्नि पृथक्प्रवाहावाकाशगंगापयसः पते
तां॥ तेनोपमीयेत तमालनीलमामुक्तमुक्तालतमस्य वक्षः॥८॥ तेनांभसां सारमयः पयोधेर्दध्रे मणि
र्दीधितिदीपिताशः॥ अंतर्वसन्बिंबगतस्तदंगे साक्षादिवालक्ष्यत यत्र लोकः॥९॥ मुक्तामयं सारस
नावलंबी भाति स्म दामाप्रपदीनमस्य॥ अंगुष्ठनिष्ठ्यूतमिवोर्ध्वमुच्चैस्त्रिस्रोतसः संततधारमंभः॥१०॥
सरत्ननालस्थलनीलमूर्तिरराजकर्बूरपिशंगवासाः॥ विसृत्वरैरंबुरुहां रजोभिर्यमस्वसुश्चित्र इवोदनी
रः॥११॥ प्रसाधितस्याथ मधुद्विषोभून्नदन्येव लक्ष्मीरिति युक्तमेतत्॥ वपुष्यशेषेखिललोककांता सा
कुचिस्तत्रे४
समूहः१ प्रसन्नस्य१ पादाग्रपर्यंतं मुक्ताहारः३ निस्तृतं२ खं२
हरितलक्ष्मीवर२ विशीर्णैः२

यत्के३ स्थिता१ अत्यावरणैवर वेश्यामासुः३ फांतार दशातरः३
दृष्टिंतनयनाः५ प्राधाः५ तस्मिसमये

नन्यकांतासु रसितं तरां तु ॥२२॥ कपाटविस्तीर्णमनोरमोरस्थलस्थितश्रीललनस्य तस्य ॥ आनंदि
ताशेषजना बभूव सर्वांगसंगिन्यपरैव लक्ष्मीः ॥२३॥ दैत्याधिपप्राणमुषां नखानामुपेयुषा भूषणतां
क्षतेन ॥ प्रकाशकार्कश्यगुणौ दधानौ स्तनौ तरुण्यः परिवव्रुरेनं ॥२४॥ आकर्षतेवोर्द्ध्व मौतिकशापा
स्फुरन्नतत्याः कुचमंडलेन ॥ न नाम मध्योति गुरुस्तनाज्ञानितांतमाक्रांतरवांगनानां ॥२५॥ यां या
प्रियः प्रैक्षत कातराक्षीं सा सा ह्रीयानम्रमुखी बभूव ॥ निःशंकमन्याः सममाहितेर्ष्यास्तत्रांतरे
जघ्नुरमुं कटाक्षैः ॥२६॥ तस्यातसीसूनसमानभासो भ्राम्यन्मयूखावलिमंडलेन ॥ चक्रेण रेजे
यमुनाजलौघः स्फुरन्महावर्त इवैकबाहुः ॥२७॥ विरोधिनां विग्रहभेददक्षा मूर्तेव शक्तिः क्वचि
दस्खलंति ॥ नित्यं हरेः संनिहिता निकामं कौमोदकी मोदयति स्म चेतः ॥२८॥ न केवलं यः स्वतन
या मुरारेरनन्यसाधारणतां दधानः ॥ अत्यर्थमुद्वेजयिता परेषां नाम्नापि तस्यैव स नंदकोऽभूत् ॥

अवलोकयामासुः४ सम२ अनपायिनी२ आनंदयतिस्म२
अप्रतिहंता२ अतिहंता१ अतिदयिता१ ॥२९॥

कोदारथं४   श्रीघ्रगामिनं४   प्रवेष्टुं इच्छन्निव२   रागकर्मसु१   पदं१   अप्रतिहतगमनं२   प्रतिबिंबिताः४
पुष्यनन्द्रे क्षे४   कोपयितुं५   संपादः१   स्थानं४   अंतिकचरश्चासौ२

ननीतमन्येननतिंकदाचित्कर्णांतिकप्राप्तगुणांक्रियासु ।। विधेयमस्यान्वचरंतिकस्थंशार्ङ्गंधनु
र्मित्रमिवद्विपः ।।२०।। मदद्रुमंगांबुदधीरनादः कर्णांतिन्याणर्वचरैकहंसः ।। मंदानिलोत्पूरकृतं   वा२
न२   दधानोनिधानमस्मूयेपांचजन्यः ।।२१।। ररासकमिष्टसिद्धैः सर्वासुदिक्षुप्रतिषिद्धमार्गः ।। महारथः
पुष्परथंदधांगीक्षिप्रंसपानाथइवाधिरूढः ।।२२।। धनुर्ज्याघोषमोदृष्टशोथशौरेः संक्रांतमूर्तिर्मणि
मेदिनीषु ।। फणावनस्त्रीसयितुंरसायास्तलंविविक्षन्निवपन्नगारिः ।।२३।। यियासतस्यस्तेमही
रंध्रनिर्दापटीयान्पटहप्रणादः ।। लोकांतराणीवमहार्णवौघः शब्दांतराण्यंतरयांचकार ।।२४।।
प्रत्रसत्कर्तालगताअगामथब्रुवाधरित्र्याः फणिनामतोधः ।। महाननरात्नुंनशिरस्सहस्त्रसहायकव्यी
ग्रकुलंप्रसस्त्वे ।।२५।। अथोच्चकैस्तोरणसंगभंगान्ययावनम्रीकृतकेतनानि ।। क्रियाफलानीव
खुनीतिकालंसैन्यानिसोमान्यमनयुस्त्वं ।।२६।। श्यामारुणोर्वाराणदाननोयैरालोडिताःकांचे

नैरे प्रवेशान४   दुंदुभेः४   कर्णमनुजामुः२   अंतर्हितानि४   पर्वतः ग५
अवनतं२

माघ३

आर्यमाणाः२ वाळकान्५ चूर्णिमिः२ उद्धताः१ ज्ञातं२ अश्वाः४
कुर्वते२ सुवर्णस्य२ अश्वसादिभिः४
आकृष्यादाययया४ लोरेणु२

नच्छ्रपरागाः॥ आनेमिमग्नैः शितिकंठपक्षक्षोदद्युतिर्भ्युक्षितिरेरथौघैः॥२७॥ नलंघयामास महा
सूनानां क्षितांसि नैवोद्धृतिमाडगाम॥ अवैक्ष्य तौः॥ हापरस्मिन्निरेणुः खुराहतोयस्य दपांगरिम्नाः॥
२८॥ निरुद्धमानौ यदुभिः कथंचिन्मुहुर्यदुच्छिक्षिपुरप्यपादैः॥ ध्रुवं गुरून्मार्गरुधः करीद्रानु
ल्लंघ्यगंतुं तुरगास्तदीषुः॥२९॥ अवेक्षितानायतवल्गमग्रे तुरंगिभिर्यत्र निरुद्धवाहैः॥ प्रची
डितान्नेतुमिरेस्य तूर्णं निम्नुर्द्धनम्यः पृथुकान्पथिभ्यः॥३०॥ दिदृक्ष्यमाणाः प्रतिरथ्यमीयुर्मुरा
रिमाराद्नघंजनौघाः॥ अनेकशः संस्तुतमप्यनल्पा नवं नवं प्रीतिरहो करोति॥३१॥ उपेयुषो
वर्त्मनिरंतराभिरसौ निरुच्छ्वासमनीकिनीभिः॥ रथस्य तस्यां पुरि दत्तचक्षुर्विधानिरामौ सरश ॥१४॥
मेनेर्नपातं॥३२॥ मध्येसमुद्रं ककुभः पिशंगीर्या कुर्वती कांचनवप्रभासा॥ तुरंगकांतामुखहव्य
वाहज्वालेव भित्वा जलमुल्ललास॥३३॥ कृतास्पदा भूमिभृतां सहस्रैरुदन्वदंभः परिवीतमूर

गमनं नविवेद२ उद्धातो२ बहुवारं परिचितं वस्तु४ प्राकाराणां२ वडवाग्नेः२ प्रान्तस्य४
उद्धतौसे२ सेनाभिः३

16

अखिन्नेनैः १ परंपरासु ७ प्रतिछायास्व १ प्राप्तं १ अपहरत्सु ५
प्रकर्षः २ आपत्ति ५ पुंजीकृतानि ५ जलनिर्गममार्गागतैः ५ कुः २ स्वर्गस्य २

र्तिः॥ अनिर्विदा या विदधे विधात्रा पृथ्वी पृथिव्याः प्रतियातनेव॥ २४॥ त्वष्टुः सदाभ्यासगृहीतशिल्पविज्ञा
नसंपत्प्रसरस्य सीमा॥ अदृश्यतादर्शतलामलेषु छायेव या स्वर्जलधेर्जलेषु॥ २५॥ रथांगभर्त्रेभिनवं
वराय यस्याः पितेव प्रतिपादितायाः॥ प्रेम्णोपकंठं मुहुरंकभाजो रत्नावलीरंबुधिराबबंध॥ २६॥ यस्या
श्चलद्वारिधिवारिवीचिछटोछलछंखकुलाकुलेन॥ वप्रेण पर्यंतचरोडुचक्रः सुमेरुवप्रोन्वहमन्व
कारि॥ २७॥ वणिक्पथे पूगकृतानि यस्यां भ्रमागतैरंबुभिरंबुराशिः॥ लोलैरलोलद्युतिभांजि मुहुर्म
[illegible]रत्नानि रत्नाकरतामवाप॥ २८॥ अंभश्च्युतः कोमलरत्नराशीनपांनिधिः फेननिरुद्धहासः॥ यत्रा
वेदातुमिवाधितल्पं प्रसारयामास तरंगहस्तैः॥ २९॥ यच्छालमुत्तुंगतया विजेतुं दूरादुदस्थीयत
सागरस्य॥ महोर्मिभिर्व्याहतवांछितार्थैर्व्रीडादिवाभ्यासगतैर्विलिल्ये॥ ३०॥ कुतूहलेनेव जवादुपेत्य
प्राकारपंक्त्या सहसा निषिद्धः॥ रसन्निरोधाद्भृशमंबुवर्षव्याजेन यस्या बहिरंबुवाहः॥ ३१॥ यदंग
नारूपसरूपतायाः किंचिद्गुणभेदकमिच्छतीभिः॥ आराधितोद्धा मनुरप्सरोभिश्चक्रे प्रजाः स्वाः स

हृदेषु ४ पर्जन्यः २ श्रावणः ५ समीपे २ प्राकारः ४ औन्नत्येन ४ [illegible] ४
निवारितः २ प्रार्थितः १ नत्येन १

17

मा.घ.२

बकुलमयूः ४ अनुमिश्रया १ दारुमयपत्रिकाणां १ तन्नाम प्रसरति न दोषस्य १ अपकृष्टाः २ जलमार्गाः ४
निवार्य ५ गवाक्षेभ्यः ५ कुलांगनाः ५ तुल्याः २

निमेषचिह्नाः ॥५२॥ विध्वंसयां वृत्तिमपाचि पंक्तेः कपोतपालीषु निकेतनानां ॥ मार्जारमप्यानत
निश्चलांगं यस्यां जनः कृत्रिममेव मेने ॥५३॥ स्फुरत्तुषारांशुमरीचिजालैर्विनिह्नुताः स्फाटिक
सौधपंक्तीः ॥ आरुह्य नार्यः क्षणदासु यस्यां नभोगता देव्य इव व्यराजन् ॥५४॥ कांतेंदुकांतो
पलकुट्टिमेषु प्रतिक्षपं हर्म्यतलेषु यत्र ॥ उच्चैरधः पातिपयोमुचोपि समूहमूहुः पयसां प्रणाल्यः ॥५५॥
रतौ ह्रिया यत्र निशाम्य दीपान् जालागतान्योषि गृहं गृहिण्यः ॥ बिभ्युर्विडालेक्षणभीषणाभ्यो
॥१५॥ वैदूर्यकुड्येषु शशिद्युतिभ्यः ॥५६॥ यस्यामतिश्लक्ष्णतया गृहेषु विधातुमालेख्यमशक्नुवंतः ॥
चक्रुर्युवानः प्रतिबिंबितांगाः सजीवचित्राइव रत्नभित्तीः ॥५७॥ सा वर्णचित्रा लां प्रतिमागतानां
लक्ष्यैः स्मरापांडुतया गनानां ॥ यस्यां कपोलैः कलधौतधामस्तंभेषु भेजे मणिदर्पणश्रीः ॥५८॥ ॥१५॥
मुक्तागवाक्षोपलनिर्मितानां लिलेषु चा सा गृहदेहलीनां ॥ यस्याममलिंदेषु न चक्रुरेव मुग्धांग

संक्रांताभ्यः शो ४ सचेतनाः कुशलतया ४ भिन्न २ चित्रं ४ प्रतिबिंबितानां २
सौवर्णमिव २ द्वारबहिर्भागे १

18



लेपनानि १ पद्मांतरैः ३ तंवाग्रपणानि २ मंदुराणां १ पिद्धकारैः १ वरूकसम्नैः २

अद्भुतैः २ वंशापंजेषु २ विड़नाः ५ अनुपमैः २ अधिरूढ इति स्मऽ४ आच्छादितैः २

नागोमयगोंमुखानि ॥४९॥ गोपानसीषु क्षणमास्थितानां विलंबिनिःभ्रंदकिणांकलापैः ॥ हरिन्मणि
श्यामतृणाभिरामैर्गृहाणि नीध्रैरिव यत्र रेजुः ॥५०॥ वहन्तु लैरप्यतुलैर्वितानमालापिनद्धैरपिचा
जैः २ विताननैः ॥ रेजे विचित्रैरपि या सचित्रैर्गृहैर्विशालैरपि भूरिशालैः ॥५१॥ क्षितिप्रतिष्ठोपि मुखार
विंदैर्वधूजनश्चंद्रमधश्चकार ॥ अतीतनक्षत्रपथानि यत्र प्रासादशृंगाणि वृथाध्यरोहत् ॥५२॥
रम्या इति प्राप्तवतीः पताकाः रागं विविक्ता इति वर्द्धयंतीः ॥ यस्यामसेवंत नमद्वलीकाः समं वधूभि नीध्राः ५
र्वलभीर्युवानः ॥५३॥ सुगंधितामप्रतिमल्लपूर्वां बिभ्रंति यत्र प्रमदाप्रसूनां ॥ मधूनि वक्त्राणि चका
साना नामामोदकमर्प्पयंति हारंमायुः ॥५४॥ रत्नांतरे यत्र गृहांतरेषु वितर्दिनिर्व्यूहविटंकनीडः ॥ स्त्रग्ग्रपताव्रि रिनगढः
रुतानि म्लानच यूसांगणोते सि वोत्व मापस्फुटमंगनानां ॥५५॥ छन्नेषु पिष्टोच्छितरेषु पत्रश्यो
नि नारीकुचमंडलेषु ॥ आकाशमस्याम्यं दधुरं बुणा निनाम मनः केवलमर्थतोपि ॥५६॥ यस्याम
लिंस्साम हिनीम यं कोः सामानमस्यापन यो त्पठंतः ॥ जनैरजातस्खलनैर्नजातु द्वयमप्युच्चांतलिनी

कूटागाराणि ५ निषण्णाः १ परस्परकरणं ४ अकाशिमां ५ पाषाणादिनिर्मिता विहारवेदिकाः मत्तवारणा उपायाः तेषां ५

शाकपटा १ मर्यादा १ अनृणा नास्थितं १ आकाशः इरकी कथत्र निरूढारराग्राः १ कपोतपालिकाः शाखासः ४ खाः सुरवेदिता आश्रयो

माघ. २

पुरवायपदः१० घुनश्चोषेः१ हराचकार२ शोधौनि२ कल्पितः१ निष्पादयतीः२ निर्माणेन१ वज्रकाट [illegible]
वसवः२ अपवादः२ पुत्रत्वं५ वल्कलः४

तं मार्गमितः॥५७॥ परस्परस्पर्द्धिपरार्ध्यरूपाः पौरस्त्रियो यत्र विधाय वेधाः॥ श्रीनिर्मितिप्राप्तघुणाक्षरैकवर्णोपमावाच्यमलं ममार्जे॥५८॥ क्षुण्णं यदंतःकरणेन वृक्षाः फलंति कल्पोपपदास्तदेव॥ अध्यूषुषो यामन्नवज्जनस्य यासांपरस्तामनसोप्यगम्याः॥५९॥ कलाधोदेनुः सकौस्वचान्निरुन्नस्सम्मन्सौधसितान्निराशाः॥ यां रेवतीजानिरियेष हातुं न रौहिणेयो न च रोहिणीशः॥६०॥ बाणाहवव्याहतशम्भुशक्तेरासत्तिमासाद्य जनार्दनस्य॥ शरीरिणा जैत्रशरेण यत्र निःशंकमूषे मकरध्वजेन॥६१॥ निषेव्यमाणा नशिवैर्मरुद्भिरध्यास्यमाना हरिणा चिराय॥ उदश्मिरत्नांकुरधाम्नि सिंधावाक्वास्त मेरावमुरावतीया॥६२॥ स्निग्धांजनश्यामरुचिः सुवृत्तो वध्वा इवाध्वंसितवर्णकांतेः॥ विशेषको वा विशिशेषयस्याः श्रियं त्रिलोकीतिलकः स एव॥६३॥ तामीक्ष्यमाणः सपुरंपुरस्तात्प्रापप्रतोलीमतुलप्रतापः॥ वज्रप्रभोद्भासिसुरायुधश्रीर्या देवसेनेव परैरलंघ्या॥६४॥

क्लाः
चंद्रः४
स्थितं५

॥२६॥

॥२६॥

आहतः३ अनितिलकः२ नंदः रुद्रैः मरुद्गणैश्च४ वृषसार२ इंद्रेण४ गौरादिनां लावण्यं३
रथ्यां१ शोभितवान्२ हिरकांतिमरणीनांगुलिरस्यच२



निर्गताः२
द्वारबहिर्मार्गात्५
अश्वसादपाः३
[illegible]दिः२
समूहः१ अतिसंकटे२ लगामैः२ तुरंगैः२
असंकीर्णप्रचुरं४ दारुविशेषाः५

॥ ॥मत्ताकुक्कुकं॥ ॥प्रज्ञाश्वांगाद्रविंदनाम्नेः शंखोर्ज्जटाजूटं तच्छादिवापः॥मुखार्पितैर्वृषभकृतपो लौ२
विधातुः पुरान्निर्ययुर्मधुजिद्ध्वजिन्यः॥६५॥श्लिष्यद्भिरन्योन्यमुखाग्रसंगस्खलत्खलीनैर्हरिभिर्विलो
क्र३ लैः॥परस्परोत्पीडितजानुभागा दुःखेन निश्चक्रमुरश्ववाराः॥६६॥निरंतरालेपि विमुच्यमाने दूरं पथि
प्राणभृतां गणेन॥तेजोमहद्भिस्तमसीव दीपैर्द्विपैरसंबाधमयांबभूवे॥६७॥शनैरनीयंत रयात्
तंतो रथाः क्षितिं हस्तिनखादखेदैः॥स यत्नसूतां यतरश्मिभुग्नग्रीवांतसंसक्तयुगैस्तुरंगैः॥६८॥बलो
[illegible]भिस्तत्क्षणहीयमानैः रथ्याभुजाया वलयैरिवास्याः॥प्रायेणानिष्क्रामति चक्रपाणौ नेष्टं पुरो द्वार
वर्त्मात्यमासीत्॥६९॥पौरेर्न लेभे नीरनिधेरपश्यन्मुसारिरानीलपलाशराशिः॥वनावलीरुत्कलि
कौसहस्रप्रतिक्षणोत्कूलितशैवलाभाः॥७०॥लक्ष्मीं कृतोऽधिनदाधिवासानुमानसौ नीरद
नीलनासम्॥लतावधूसंप्रयुज्योधिवेलं बहूकृतान्स्वानिव पश्यतिस्म॥७१॥श्लिष्टं भूमिं रसि कंदिताः२

रिच्यमानः४ परतीरेऽलब्धैः२ आरुह्य५ अयथु५ पातेसति४ आलिंगिता१ उम्मा२ ३
कूलंप्रापिताः२ सकोपविप्रतानिव२ हरिवखर

आलोकयामास२ अनिलंप्रहारः२ फेनमुद्वमंतं१ क्षितिचैः३ वर्हिरुक्ताः४

निर्मलं४ समंतत्त्वमंथया२

माघ२

तारमुच्चैर्लोलद्भुजाकारबृहत्तरंगं॥फेनायमानंपतिमापगानामसावपस्मारिणमाशशंके॥७२॥
पालाळलानांनिधिनातिगाश्रीहृद्रिंगतेप्यासनिनैवमांनाः॥क्षिप्ताइवेंदोःसरुचोधितीरंमुक्ताव
ळीराकलयांचकार॥७३॥सोतेपमुर्वीमनिशंनदंतोयैःस्थांवरष्यांतिसमंततोमी॥तान्येकदेशा
न्निहृतंपयोधेःसोंभांसिमेघान्पिबतोददर्श॥७४॥उद्धृत्यमेघैस्ततएवतोयमर्थंमुनींद्रैरिवसंप्र
णीताः॥आलोकयामासहरिःपतंतीर्नदीःस्मृतीर्वेदमिवांबुराशिं॥७५॥विक्रीयदिश्यानिधना
न्युरूणिद्वैप्यानसावुत्तमलाभभाजः॥तरीषुतत्रत्यमफल्गुभांडंसांयात्रिकानावपतोभ्यनंदत्॥ ॥१२॥
॥१२॥ ॥७६॥उत्पित्सवोंतर्नदभर्तुरुच्चैर्गरीयसानिश्वसितानिलेन॥पयांसिभक्त्यागरुडध्वजस्यध्वजानि
वोच्चिक्षिपिरेफणींद्राः॥७७॥तमागतंप्रेक्ष्ययुगांतबंधुमुत्संगशय्याशयमंबुराशिः॥प्रत्युज्जगामे
वगुरुप्रमोदप्रसारितोत्तुंगतरंगबाहुः॥७८॥उत्संगितोत्कःकनकोनम्रस्यानुदन्वतःस्वेदलवा

नौकु४ सारवन्मत्स्यधनं५ पोतवणिजः४

वसतः३ अंगीकृताः२ वायुः१

उत्तारः१ प्रतीक्षणां२ पार्श्वे२ ... सैनिकैः२ अभ्यागतस्मीनां उत्पाद्यनां२ कृतः२
नमीताः२ रैः श्रीविगतश्रियः५ नूतनः प्रतिपथं४ उन्नतानि२ गौरवं३

न्ममाऊै॥ तस्यानुवेलं व्रजतोधिवेलमेलालतास्फालनलब्धगंधः॥७९॥ उत्तालतालीवनसंप्रवृत्तसमीरसी
मंतितकेतकीकाः॥ आसेदिरे लावणसैंधवीनां चमूचरैः कच्छभुवां प्रदेशाः॥८०॥ लवंगमालाकलितावं
तंसास्ते नालिकेरांतरपः पिबंतः॥ आस्वादितार्द्रक्रमुकाः समुद्रादभ्यागतस्य प्रतिपत्तिमापुः॥८१॥ तुरगश
ताकुलस्य परितः परमेकतुरंगजन्मनः प्रमथितभूभृतः प्रतिपथं मथितस्य भृशं महीभृता॥ परिचरतो बलानुजबलस्य पु
२४ रः सततंधृतश्रियश्चिरविगतश्रियो जलनिधेश्च तदाभवदंतरं महत्॥८२॥ ॥छ॥ ॥इति श्रीशिशुपालवधे महा
काव्ये श्र्यंके कवि श्रीमाघकृतौ द्वारवतीसमुद्रवर्णनोनाम तृतीयः सर्गः॥३॥ ॥श्री॥ निश्वासधूमं स
हरत्नभाभिर्भित्वोत्थितं भूमिमिवोरगाणां॥ नीलोपलस्यूतविचित्रसानुमसौ गिरिं रैवतकं ददर्श॥
॥१॥ गुर्वीरजस्रं दृषदः समंतादुपर्युपर्यंबुमुचां वितानैः॥ विंध्यायमानं दिवसस्य कर्तुर्मार्गं पुनारोद्धु
मिवोन्नमद्भिः॥२॥ क्रांतं रुचा कांचनवप्रभाजा नवप्रभाजालभृतां मणीनां॥ श्रितं शिलाश्यामलता
भिरामं लताभिरामंत्रितषट्पदाभिः॥३॥ सहस्रसंख्यैर्गगनं शिरोभिः पादैर्भुवं व्याप्य वितिष्ठमानं॥
पतद्भिः२ खचितां४ नदत्प्रमानं२ पादैः२ प्रकारवाप्यमित्यर्थ

माघ४

तुल्यं१ चपलान्वा२ सत्यं१ ब्रह्मा४ संपिनाकं४
दियाकरेषु२ अवतंसाः५ खचिताःश्रो५

॥ विलोचनस्थानगतोष्णरश्मिनिशाकरं साधुहिरण्यगर्भं॥४॥ कचित्कलापायविपांडुराणि धौतोत्त
रीयप्रतिमैछवानि॥ अभ्राणि बिभ्राणमुमांगसंगविभक्तभस्मानमिव स्मरारिं॥५॥ छायां निजस्त्री
चटुलालसानां मदेन किंचिच्चटुलालसानां॥ कुर्वाणमुत्पिंजलजातपत्रैर्विहंगमानां जलजातपत्रैः॥
स्कंधाधिरूढोज्वलनीलकंठानुर्वीरुहः श्लिष्टतनुनहींद्रैः॥ प्रनर्तितानेकलताभुजाग्रान्रुद्रानने
कानिव धारयंतं॥७॥ विलंबिनीलोत्पलकर्णपूराः कपोलभित्तीरिव लोध्रगौरीः॥ शुचीरपः शैवलि
नीर्दधानं नवोलपालंकृतसैकताभाः॥८॥ राजीवराजीवशलोलभृंगं मुष्णंतमुष्णं ततिभिस्तरूणां॥
॥१८॥ कांतालकांताललनाः सुराणां रक्षोभिरक्षोभितमुद्वहंतं॥९॥ ॥आदिकुलकं॥ ॥मुदे मुरारेरम ॥१८॥
रैः सुमेरोरानीय यस्योपचितस्य शृंगैः॥ भवंति नोद्दामगिरां कवीनामुच्छ्रायसौंदर्यगुणा मृषोद्याः॥
॥२०॥ यतो महार्घाणि भृतान्यनूनैः प्रस्थैर्मुहुर्भूरिभिरुच्छिखानि॥ आढ्यादिव प्रापणिकादजस्रं ज
ग्राह रत्नान्यमितानि लोकः॥२१॥ अखिद्यतासन्नमुदग्रतापरविंदधानेप्यरविंदधाने॥ भृंगावली

वर्तलद्धतानि५ प्रगल्भाः३ हरंतं५ अरविंदानांस्थानं२ मिथ्याः३
क्षिपः४ वणिजस्य३ धनिकात्२ वणिजइव२

24



गुल्मोपलः२ वंशांकुरश्यामैः३ अश्वाः१
सिक्तं४ ऐरावतस्य२ पंकजानि१ वृक्षाणां४ समूहं५
समुत्पन्नद्भिः४ सूर्यकान्तैः५ आपिताः३ संपादयामास५ आधार५

यस्यतटेनिपीतरसानमत्तामरसानमत्ता॥१२॥यत्राधिरूढेनमहीरुहोच्चैरुन्निद्रपुष्पाक्षिसहस्रभाजा॥
सुराधिपाधिष्ठितहस्तिमल्ललीलांदधौराजतगंडशैलः॥१३॥विभिन्नवर्णागरुडाग्रजेनसूर्यस्यरथ्याः
परितःस्फुरंत्या॥रत्नैःपुनर्यत्ररुचारुचंस्वामानिन्यिरेवंशकरीरनीलैः॥१४॥यत्रोज्झिताभिर्मुहुरंबु
वाहैःसमुन्नमद्भिर्नसमुन्नमद्भिः॥वनंबबाधेविषपावकोत्थाविपन्नगानामविपन्नगानां॥१५॥फ
लद्भिरुष्णांशुकराभिमर्शात्कार्शानवंधामपतंगकांतैः॥शशंसयःपात्रगुणाद्गुणानांसंक्रांतिमाक्रां
तगुणातिरेकां॥१६॥ ॥कुलकं॥ ॥दृष्टोपिशैलःसमुहुर्मुरारेरपूर्ववद्विस्मयमाततान॥क्षणेक्षणेयन्न
वतामुपैतितदेवरूपंरमणीयतायाः॥१७॥उच्चारणज्ञोथगिरांदधानमुच्चारणत्पक्षिगणास्तटीस्तं॥उत्कं
धरंद्रष्टुमवेक्ष्यशौरीमुत्कंधरंदारुकइत्युवाच॥१८॥आच्छादितायतदिगंबरमुच्चकैर्गामाक्रम्यसंस्थित
मुदग्रविशालशृंगं॥मूर्ध्निस्फुरत्तुहिनदीधितिकोटिमेनमुद्वीक्ष्यकोभुविनविस्मयतेनगेशं॥१९॥उ
द्यतिविततोर्ध्वरश्मिरज्जावहिमरुचौहिमधाम्नियातिचास्तं॥वहतिगिरिरयंविलंबिघंटाद्वयपरिवा

आक्रा५

पर्वतं४
रुणसारथिः३ चंद्रे२ शोभायमानाः४ परिवारितः१
औत्सुक्यादुन्नमितकंधरं३

25

आंजुरदधानि५ शाकलाःकृताः॥ भ्रभ्राज्ञागां४ दूर्वाश्रिः सहीताः१ जनाःसे२ निष्कलंकः२
स्त्रीमुखसादृश्यं३ सुवर्णानि५

माघ ४

रितवारणेंद्रलीलां॥२०॥ वहति यः परितः कनकस्थलीः सहरितालसमाननवांशुकः॥ अचल एष भवानि
व राजते सहरितालसमाननवांशुकः॥२१॥ पृथ्वीस्व-नागमिह सानुषु सान्निषण्णाः पश्यंति शांतमलसां
द्रतरांशुजालं॥ संपूर्णलब्धललनालपनोपमानमुत्संगसंगिहरिणास्यहिमांशुमूर्तेः॥२२॥ कृत्वा पुंव
त्पातमुच्चैर्भृगुभ्यो मूर्ध्नि ग्राव्णां जर्जरा निर्झरौघाः॥ कुर्वंति द्युत्पतंतः स्मरार्तस्वर्लोकस्त्रीगात्रनिर्वाणमत्र॥ सुरवं४
२३॥ स्थगयंत्यमूः शमितचातकार्तस्वरा जलदास्तडित्तुलितकांतकार्तस्वराः॥ जगतीरिह स्फुरितचा
रुचामीकराः सवितुः क्वचित्कपिशयंति चामी कराः॥२४॥ उत्क्षिप्तमुच्छ्रितहिमांशुकरावलंबैरुत्तंभि
तोडुभिरतीवतरां शिरोभिः॥ श्रद्धेयनिर्झरजलव्यपदेशमस्य विष्वक्तटेषु पतति स्फुटमंतरिक्षं॥२५॥ ॥१९॥
एकत्र स्फाटिकतटांशुभिन्ननीरा नीलाश्मद्युतिभिदुरांभसोपरत्र॥ कालिंदीजलजनितश्रियः श्रयंते
वैदग्धीमिह सरितः सुरापगायाः॥२६॥ इतस्ततोस्मिन्विलसंति मेरोः समाननवप्रेमणिसानुरागाः॥
स्त्रियश्च पत्यौ सुरसुंदराभाः समाननवप्रेमणिसानुरागाः॥२७॥ उच्चैर्महारजतराजिविराजितासौ

मो-नां२ द्रुततरः४ व्यवहारः५ समंतात५ सुवर्णरेखया१ अवलंबितानि५
विश्वानि३ इंधस्य धनं५ रत्नतटकांतयः२

॥१९॥

26

रजतभित्तिः२ प्रहारिताः३ अतिकठिनाः२ पुष्कराश्च५ व्याप्ताः२ सुषमां१

प्रकटयता५ कनकमयीः५ प्राप्तवता५ प्राणभृतां२

दुर्वर्णभित्तिरिह सांद्रसुधासवर्णा ॥ आयाति च स्म परिपांडुरितस्मरारेरुद्वह्निलोचनललामल
लाटलीलां ॥२८॥ अयमतिजरठाः प्रकामगुर्वरलघुविलंबिपयोधरोपरुद्धाः ॥ सततमसुमतामम
गम्यरूपाः परिणतदिक्करिकास्तटा बिभर्ति ॥२९॥ धूमाकारं दधति पुरः सौवर्णे वर्णेनाग्नेः सदृशि
तटे पश्याऽस्मिन् ॥ श्यामीभूताः कुसुमसमूहैर्लीनां लीनानोंघैलीभिर्विहितरवो बिभ्राणाशाः ॥३०॥ व्योमस्पृशः
प्रथयता कलधौतभित्तीरुन्निद्रपुष्पचणचंपकपिंगभासः ॥ सौमेरवीमधिगतेन नितंबशोभा
मेतेन भारतमिलावृतवद्विभाति ॥३१॥ रुचिरचित्रतनूरुहशालिभिर्विचलितैः परितः प्रियकव्र
जैः ॥ विविधरत्नमयैः प्रतिभात्यसाववयवैरिव जंगमतांगतैः ॥३२॥ कुशेशयैरत्र जलाशयोषिता
मुदारमंतेकलभाविकस्वरैः ॥ प्रगीयते सिद्धगणैश्च योषिता मुदारमंतेकलभाविकस्वरैः ॥३३॥
आसादितस्य तमसा नियतेर्नियोगादाकांक्षतः पुनरपक्रमणेन कालं ॥ पत्युस्त्विषामिह महौषधयः

मृगविशेषाणां

आच्छादितस्य१ विकसन्नशीलैः२ गाः२ निर्गमेण१ शतपत्रैः२ सरस्सु वसंतः३

देवगायनाः१ अव्यक्तमधुराः मानसभावोपेता

नाप४

विषयं१ अनुपहतं१ कलकानि२ गुंजंति२ लताः२ भ्रमरश्रे४ कदंबः१ लक्ष्यंते१
प्रकाशितं४ मूर्छाः३ वाति२

कैलवत्स्थानंपरैरनभिभूतंमनल्पलेडंते॥२४॥ वनस्पतिस्कंधनिषण्णबालप्रवालहस्ताः प्रमदा इ
वात्र॥ पुष्पेक्षणैर्लंभितलोचकैर्वा मधुव्रतव्रातवृतैर्व्रतत्यः॥२५॥ विहगाः कदंबसुरभाविहगाः वाचः२
कलयंत्यनुक्षणमनेककलं यं॥ भ्रमयन्नुपैति मुहुरभ्रमयं पवनश्च धूतनवनीपवनः॥२६॥ वि
दधिरागमपरैर्विवृतंकथंचिद्बुतापिदुर्ग्रहमनिश्चितधालिरन्यैः॥ श्रेयान्हिलातिरिवहनु
मघानिदक्षंगूढार्थमेघनिधिमेव मनागतातां विलुतिं॥२७॥ विबोधंबहुमनुतेनुरंगवक्रश्चुवंतमु
खमिह किंनरं प्रियायाः॥ श्लिष्यंतं मुहुरितरोपितं नितंबे भिल्लीघुतुंगस्तनभरभंगुरोरुमध्या॥२८॥
॥२०॥ पूरेदत्रस्यानुतटं विनाति वनं ततानेकतमालताले। न पुष्पिताचस्थगितार्करश्मावनेतता ॥२०॥
नेकतमालताले॥२९॥ दंतोज्वलासु विमलोपलमेखलांतां सुद्रत्नचित्रकटकासु बृहन्नितं
बाः॥ अस्मिन्भजंति घनकोमलगंडशैला नार्योनुरूपमधिवासमधित्यकासु॥३०॥ अ

अनेकाः२ गत्यंतं२ आलिंगितं४ तुरंगदेहः४ तिरोहितातपेषु अपारविस्तारे२
विस्तृताः२ स्थलोपलाः२ सानूनि२
सुस्पर्शाः२

आविलं येन मुक्तस्य१ मुग्धाचासौ रतं तस्याः नि:२ सादरपं१ खंडितं५
संकुचितो३

नैतिचिरोसितैस्यउलवधैनाचिरखछितबहुबुद्बुदस्य पयसोनुकृतिं॥ विरलविकीर्णवज्रशकलासक
लामिह विदधाति धौतकलधौतमही॥४१॥ वर्जयंत्याजनैः संगमेकांततस्तर्कयंत्यासु[illegible]गमेकांत सं२
तः॥ योषयैषस्मरासन्नतापांगया सेव्यतेनेकया सन्नतापांगया॥४२॥ संकीर्णकीचकवनस्खलि
तैकवालविछेदकातरधियस्यश्चलितुं चमर्यः॥ आस्मिन्मृदुश्वसनगर्भतदीयरंध्रनिर्यत्स्वरश्रुति
४५ सुखादिनोत्सहंते॥४३॥ मुक्तं मुक्तागौरमिह क्षीरमिवाभ्रैर्वापीष्वंतर्लीनमहानीलदलासु॥ शस्त्री
भि श्यामैरंशुभिराशुद्रुतमंभश्छायामच्छाम्च्छति नीलीसलिलस्य॥४४॥ यानययौप्रियमन्यवधूभ्यःसा
रतरागमनायतमानं॥ तेनसहेहबिभर्तिरहःस्त्री सारतरागमनायतमानं॥४५॥ भिन्नेषुरत्नकि
ग२ रणैःकिरणोष्विहेंदोरुच्चावचैरुपगतेषु सहस्रसंख्यां॥ दोषापिनूनमहिमांशुरसौकिलेति व्याको
शकोकनदतांदधते नलिन्यः॥४६॥ अपशंकमंकपरिवर्तनोचिताश्चलिताःपुरःपतिमुपैतुमा

इंद्रनीलमणिकिरणैः मिश्रितं४ निःशंकं१ रतौ१ अराधरोपं२ विकचपद्मतां२ अोषां
प्रार्थयमानं२ कांतिं गच्छति४ सुरताभिलाषं२

माघ४

तोयनं कुर्वतरवर
उर्ध्वप्रदेशात्‌३
स्वर्गादिभिः मंडिताः३
सप्तत्रः५
मन्मबालानां चुंबनेप्रासाः२
ग्रंथिताः४

स्मज्ञाः॥ अनुरोदितीव करुणेन पत्त्रिणां विरुतेन वत्सलतयैष निम्नगाः॥४७॥ मधुकरविटपानमि
तास्तरुपंक्तिर्बिभ्रतोस्य विटपानमिताः॥ परिपाकपिशंगलतारजसा रोधश्चकास्ति कपिशंगलता॥
॥४८॥ प्राग्भागतः पतदिहेदमुपत्यकासु शृंगारितायतमहेभकराभमंभः॥ संलक्ष्यते विविधरत्न
करानुविद्धमूर्द्धप्रसारितसुराधिपचापचारु॥४९॥ दधति च विकसद्विचित्रकल्पद्रुमकुसुमैरभिगुं
फितानिवैताः॥ क्षणमलघुविलंबिपिछदाम्नः शिखरशिखाः शिखिशेखरानमुष्य॥५०॥ सवधूकाः
सुखिनोस्मिन्ननवरतममंदरागतामरसदृशः॥ नासेवंते रसवन्न नवरतममंदरागतामरसदृशः॥
॥५१॥ आछाद्य पुष्पपटमेष महांतमंतरावर्तिभिर्गृहकपोतशिरोधराभैः॥ स्वांगानि धूमरुचिमाग
रवीं दधानैर्धूपायतीव पटलैर्नवनीरदानां॥५२॥ अन्योन्यव्यतिकरचारुभिर्विचित्रैरत्रस्यन्नवमणि
जन्मभिर्मयूखैः॥ विस्मेरान्गगनसदः करोत्यमुष्मिन्नाकाशे रचितभित्तिचित्रकर्म॥५३॥ समी

निश्रीनाचेन२ तनसुबद्धं तं४ भसरोयरागाः दृष्टं तः२

॥२१॥ ॥२१॥



पंक्तीः स्व २ नारस्फुरिताः १

२ मैत्री करुणा मुदिता उपेक्षेति चतस्रः चित्तवृत्तयः । सुखपुरुषे मैत्री दुःखिषु करुणा सुखिषु मुदिता अनुमोदनं पापेषु उपेक्षा इत्यादीनि चित्तस्य शोधनानि

निःसाधनानि नानि सजंतिते २ अविद्या अस्मिता रागद्वेष अभिनिवेश इति पंच क्लेशाः अनिसे षुनिसत्वानि मानः अः अहंकारः अः आदि मनविषया

निरूपकः राः अनानि मनवृतेषः [illegible] का परिपक्व बिर ग्रहः अभिः रत्नेतेषां प्रभेदः २

रशिशिरशिशिरस्स्नुवसतां सतां जवनिकानिकाम सुखिनां ॥ बिभर्ति जनयन्नयं मुदमपामपायधवला

बलाहकततीः ॥ ५४ ॥ मैत्र्यादिचित्तपरिकर्मविदो विधाय क्लेशप्रहाणमिह लब्धसबीजयोगाः ॥ ख्याति ध्यानं २

च सत्वपुरुषान्यतयाधिगम्य वांछंति तामपि समाधिभृतो निरोद्धुं ॥ ५५ ॥ मरकतमणिमेदिनीषु भा-

नोस्तरुविटपांतरपातिनो मयूखाः ॥ अवनतशितिकंठकंठलक्ष्मीमिह दधति स्फुरिताणुरेणुजा-

लाः ॥ ५६ ॥ या विभर्ति कलवल्लकीगुणस्वानमानमतिकालिकामलया ॥ नात्र कांतमुपगीतया तया

स्वानमानमतिकालिमालया ॥ ५७ ॥ सायं शशांककिरणाहतचंद्रकांतनिस्यंदिनीरनिकरेण कृ-

ताभिषेकाः ॥ अर्कोपलोल्लसितवह्निभिरह्नि तप्तास्तीव्रं महाव्रतमिवात्र चरंति वप्राः ॥ ५८ ॥ एतस्मि-

न्नधिकपयःश्रियं वहंत्यः संक्षोभं पवनभुवा जवेन नीताः ॥ वाल्मीकेररहितरामलक्ष्मणानां सा-

धर्म्यं दधति गिरां महासरस्यः ॥ ५९ ॥ इह मुहुर्मुदितैः कलभैः रवः प्रतिदिशं क्रियते कलभैरवः ॥

व १ स्फुरति चानुवनं चमरीचयः कनकरत्नभुवां च मरीचयः ॥ ६० ॥ त्वक्साररंध्रपरिपूरणलब्धगीतिरस्मिन्नसौ च १

[illegible] ति पुरुषयोः मिथो भिन्नतेनैव ज्ञानं ख्यातानां निवर्तयितुं ॥ उपमानं ६ अतिशयामा ६ लघवः १ मधुरः २ स्वादः ३

सुखेन आकृष्टुं शक्या ५ मृगसंघः १ नद्याः ४ वंशानां १

सोमशाभिः१ । कंबकमृगाणांश्रंगानि२ चंदनवृक्षस्य२ संघर्षेण१ अस्मानपाङ्गिमन्यते२ अंगमर्दः२
निःश्वासयोः३ स्त्रीपुंसयोः२ मत्तेन४ हिमेन४ शीतोष्णाभ्यां५

माघ७

मृदितपक्ष्मलरल्लकांगः॥ कस्तूरिकामृगविमर्दसुगंधिरेति रागीव सक्तिमधिकां विषयेषु वायुः॥
॥६१॥ प्रोत्सेयूनोर्व्यवहिततपने प्रौढध्वांते दिनानिह जलदाः॥ दोषामन्यं विदधति सुरतक्रीडायास
श्रमशमपटवः॥६२॥ न म्रौलिर्निवासो धमिहास्य पुंषोस्य दानतोयेन विषाणि नागाः॥ तीक्ष्णानि
नो सातिकोपि सौनौ सदानतोयेनैव विषाणि नागाः॥६३॥ प्रालेयशीतमचलेश्वरमीश्वरोपि सां
द्रेभचर्मवसनावरणोधिशेते॥ सर्वर्तुनिर्वृतिकरे निवसन्नुपैति न द्वंद्वदुःखमिह किंचिदकिंच
न४ नोपि॥६४॥ नवनगवैरेखाश्याममध्याभिराभिः स्फुटिककटकभूमिर्नाटयत्येष शैलः॥ अहिप
रिकरभाजो भास्मनैरंगरागैरधिगतधवलिम्नः शूलपाणेरभिख्यां॥६५॥ दधद्भिरभितस्त ॥२२॥
॥२२॥ टौ विकचवारिजांबुनदैर्विनोदितदिनक्लमाः कृतरुचश्च जांबुनदैः॥ निषेव्यमधुमाधवाः स
रसमत्र कादंबरं हरंति रतये रहः प्रियतमांगकादंबरं॥६६॥ दर्पणनिर्मलासु पतिते घनति

शोभां२ अनुकरोति१ गात्रसंघे
रहस्यं२ हृताश्चतः२ कनककमलैः२ यादवाः२

उत्सङ्गे:२

आप्रियरहिता:५

मिरमुषिज्योतिषिरौप्यभित्तिषुपुरःप्रतिफलतिमुहुः॥व्रीडमसंमुखोपिरमणैरपहृतवसना॥कांच
नकंदरासुतरुणीरिहनयतिरविः॥६७॥अनुसृतनशिखरौघश्रीभिरभ्यागतोसौत्वयिसरभस
मभ्युत्तिष्ठतीवाद्रिरुच्चैः॥द्रुतमरुदुपनुन्नैरुन्नमद्भिःसहेलंहलधरपरिधानश्यामलैरंबुवाहैः॥
॥६८॥ ॥३॥ ॥इति श्रीशिशुपालवधे महाकाव्ये श्र्यंके कविश्रीमाघकृतौ रैवतवर्णनो नाम
चतुर्थःसर्गः॥ ॥४॥ ॥श्री॥ ॥इत्थंगिरःप्रियतमाइवसोर्व्यलीकैःशुश्रावसूततनयस्यतदाऽ व४
असत्यं:४ व्यलीकाः॥रंतुंनिरंतरमियेषततोवसानेसांतोगिरौचवनराजिपटंवसाने॥१॥तंसद्विपेंद्रतु
लितंतुंगशृंगमभ्युल्लसत्कदलिकावनराजिरुच्चैः॥विस्तारुद्धवसुधोन्वचलंचचालंल
क्ष्मीर्दधत्प्रतिगिरेरलघुर्बलौघः॥२॥क्रांत्स्वलंकरव्यतिकरोल्लसितांबरांताःसपित्रपाइवमहाज
नदर्शनेन॥संविव्युरंबररविकाशिचमूसमुत्थंपृथ्वीरजःकरभकंठकडारमाशाः॥३॥आवर्ति

धूलीएव३ सूर्यकिरणस्पर्शेन गलिताः२ आछादयति४ मतस्ये३

उपमितानि-अप्रतिमानी३

आछादयामासुः१

५

४

33

मा॰ च॰ ५ १~४

चंचलं ४ संपन्नाः २ पर्णाः २ आच्छादयंति स्म २ स्थलंपथा २
उत्थानं कुर्वन् २ सक्तः चोरोपथा २ कुंजरपोरध्वाने २ अंकुशं २ नयं प्राप्तौ २ मन्येते

नः श्रुतफलप्रदभुक्तिमुक्ताः संपन्नदेवमतयोन्नतुं रंध्रनागाः॥ ॥ अश्वाः पर्युर्वसुमती मतिरोच मा
नास्तृणं पयोधययद्वोर्मिभिरापतंतः॥४॥ आरक्षमग्नमवमत्य सृणिं शिताग्रमेकः पलायत जवे
न कृतार्तनादः॥ अन्यः पुनर्मुहुरुदप्लुतवतास्तनारमन्योन्यतः पथि बतौ विकृतौ मिलोढौ॥५॥ आ
यस्तमैक्षत जनश्चटुलाग्रपादं गछंतमुच्छलितचामरचारुमश्वं॥ नागं पुनर्मृदुसलीलनिमी
लिताक्षं सर्वः प्रियः खलु भवत्यनुरूपचेष्टः॥६॥ त्रस्तः समस्तजनहासकरः करेणोस्तावत्खरः
नरांच प्रखरमुल्ललयांचकार॥ यावच्चलासनविलोलनितंबबिंबविस्रस्तवस्त्रमवरोधवधूः पपात॥७॥
शैलोपशल्यनिपतद्रथनेमिधारानिष्पिष्टनिष्ठुरशिलातलचूर्णगर्भाः॥ भूरेणवो नभसि ब
॥२३॥ द्धपयोदचक्राश्चक्रीवदंगरुहधूम्ररुचो विसस्रुः॥८॥ उद्यत्कृशानुशकलेषु खुराभिघाताद्भूमी ॥२३॥ २
समायतशिलाफलकाचितेषु॥ पर्यंतवर्त्मसु विचक्रमिरे महाश्वाः शैलस्य दर्दुरपुटानिव वाद

उत्पपात ४ गर्दभस्य २ अस्थितेषु २ प्रसृताः २ जग्मुः १ स्फुलिंगाः २ साधवि शेषाणां मुखानि १
शांते २ प्रांतमार्गेषु २

वेगस्यनिरोधवारणेसाम्यं २ मंडलगतिविशेषेण २ द्विगुणा २ अश्वः १ चपलः १
कुशलेन २ आवरितुमिच्छुः ३ आच्छादयतिस्म ५ मकालाम् ४

यंतः ॥ ९ ॥ तेजोनिरोधसमतावहितेन यंत्रा सम्यक्कशात्रयविचारविदा नियुक्तः ॥ आरट्टजश्चटुलनिष्ठुरपा
तमुच्चैश्चित्रं चकार पदमर्द्धपुलायितेन ॥ १० ॥ नाहारजालमलिनः पुनरुक्तसारः कुर्वन्चधूलनविलो हत्वा ३
चनपक्ष्ममालाः ॥ क्षुत्साक्षणं यदुबलैर्दिवमातितांसुः पांसुर्दिशां मुखमतुत्थयदुच्छितो द्यैः ॥ ११ ॥ उच्छि
ध्रविद्विष इव प्रसभं मृगेंद्रानिंद्रानुजानुचरभूमिभुजोऽध्यवात्सुः ॥ वन्येभमस्तकनिखातनखाग्रमुक्तै ऽकलापं ५
मुक्ताफलप्रकरभाञ्जिगुहागृहाणि ॥ १२ ॥ बिभ्राणया बहुलयावकपंकपिंगपिच्छावचूलमनुमाध
ग्रहं ४ वधामजग्मुः ॥ चंचुग्रहदृढचटुलाहिपताकयान्ये साचावसन्नागमुरगाशनकेतुयष्ट्या ॥ १३ ॥ छाया
मपास्य महतीमपि वर्त्तमानामागामिनीं जगहिरे जनताः स्तरूणां ॥ सर्वो हि नोपगतमप्यपची
यमानं वर्द्धिष्णुमाश्रयमनागतमभ्युपैति ॥ १४ ॥ अध्येगतेन वसतिं परिगृह्य रम्यापोमोत्युसैनिक
निराकरणाकुलेन ॥ यांतोऽन्यतः प्लुतकृतः स्वरमाशु दूरादुद्वाहुनाजुहुविरे मुहुरात्मवर्ग्याः ॥ १५ ॥ सि

ग्रासं ३ श्रीयमाणा २
व्यग्रेण १ आक्रुताः १ स्वपुष्ट्याः १

खोडेः २ इव २ रक्तवस्त्राणि २ अवतार्यमाणाः २ दूरीकरणे २ अंतःपुराधिकारिणः ४

मृदवः ४

माघ ५

क्रीडारसेन मुहुर्जलानां क्लांतिच्छिदो न गवनस्पतयस्तदानीं॥शाखावसक्तवसनाभरणाभिरा
माः कल्पद्रुमैः सह विचित्रफलैर्विरेजुः॥यानाज्जनः परिजनैरवरोप्यमाणा राज्ञीर्नरापनयनाकुल
सौविदल्लाः॥स्रस्तावगुंठनपटं क्षणलक्ष्यमाणवक्त्रश्रियः सभयकौतुकमीक्षते स्म॥१७॥कं
ठावसक्तमृदुबाहुलतास्तुरंगाद्राजावरोधनवधूरवतारयंतः॥आलिंगनान्यधिकृताः स्फुटमापुरे
व गंडस्थलीः शुचितया न चुचुंबुरासां॥१८॥छेदैर्विनिर्जितकलापभरामेचकत्वाकीर्णमाल्यप
कैबरां कैबरीं तरुण्याः॥ पांडुवस्त्रपदि चंद्रकवाननुनाय यात्रां सह गुणान्यधिकैर्दुरासं॥
॥२५॥ ॥१९॥रोधिघ्नुकांचनचयां भूपिशांगिताशा वंशाद्धीनैर्नलदसंहतिमुल्लिखंतः॥कूलंतुरायन ॥२५॥
नि रं करसंन्निविष्टाः पादाद्वाधिवधुरावलयोरथानां॥२०॥छायाविधायिभिरनुस्मितकांतिशो
भैरुद्धायिभिर्बहुलपाटलधातुरागैः॥दूष्यैरिव क्षितिभृतां द्विरदैरुदारतारावलीविचरनै

कृष्णवर्णा ४ केशपाशः ४ अन्वितः शुशुभुः २ मयूरः ४ मत्तवारणाः ४ करतले ५ उत्तमानां २

कांतिः २ शुभ्रमौक्तिकानां रज्जुसंततीनां २

प्रत्यंतपर्वताः २ घनस्थिताः २ पटमंडपैः २

शोरुं तेस्म १ प्रकाशमानं २ कृशं २ उपशमिताः ५ सम्मूह एव आस्तीर्णं १
सेनानिवेशस्थाः ४ वणिजः ५ निर्ममुः ५ मंडपाभिरोः ४ कंचुकं २

र्यैरुच्चैर्निवासाः॥२१॥उत्क्षिप्तकांडपटकांतरलीयमानमंदानिलप्रशमितश्रमघर्मतोयैः॥दूर्वाप्रता
नसहजास्तरणेषु भेजे निद्रासुखं वसनवेश्मसु राजदारैः॥२२॥प्रस्वेदवारिसविशेषविषक्तमंगे कूर्पास
कं क्षतनखक्षतमुत्क्षिपंती॥ अविर्भवद्घनपयोधरबाहुमूला शातोदरी युवदृशां क्षणमुत्सवोभूत्॥
॥२३॥ यावत्स एव समयः सममेव तावदव्याकुलाः पटमयान्यभितो वितत्य॥ पर्याप्तकृत्यकलिलो
व्यवहारे ५ मगण्यपण्यपूर्णापणा विपणिनो विपणीर्विभेजुः॥२४॥ अल्पप्रयोजनकृतोरुतरप्रयासैरुद्धर्तितोल
घुलगुडैः परितोनुबद्धः॥ उद्धांतमुद्रुतमनोकहजालमध्यादन्यः शशो गुणाम्रनल्पमनैवन्नवाप॥२५॥
त्रासाकुलः परिपतन्परितो निकेतान्पुंभिर्न कैश्चिदपि धन्विभिरन्वबंधि॥ तस्थौ तथापि न मृगः
क्वचिदंगनाभिराकर्णपूर्णनयनेषुहतेक्षणश्रीः॥२६॥ आस्तीर्णतल्परचिता वसतेः क्षणेन वेश्या
जनः कृतनवप्रतिकर्मकाम्यः॥ खिन्नानखिन्नमतिरापततो मनुष्यान्प्रत्यग्रहीच्चिरनिविष्टइवोपचारैः॥२७॥ चारै १

असंख्येयैः वस्तुभिः ५ उच्छितं ४ पलायितं दक्षताभिः ४ मृगविशेषं ४ हंतृभिर्निवार्यरसन्तं ४
पूषणाभः कृतार्थः ४ प्रसाधनेनसास्पदं २ उत्कर्षं प्राप्तं ४ प्रयुंजानः सन् ४
नानुयातः २ वशीचकार १ कल्पितानि केतव २

37

सुदेशाः५ हराकुन२ भक्षयांचक्रुः१ वाच्यविशेषरवसुंदरं३ सेना॰ समवेताः सै१
शरसाव ववाम्य५ प्रक्षालयन२ हस्तीनांसमूहाः५ सिषिचुः६ गत्ताः रैः२

माघ५

सस्नुःपयःपपुरनेनिजुरंबराणिजक्षुर्बिसंघृतविकाशिबिसप्रसूनाः॥सैन्याःश्रियामनुपभोगनिर
र्थकत्वदोषप्रवादममृजन्नगनिम्नगानां॥२८॥नालीहृदैःपरिगृहीतरयाणिनिम्नैःस्त्रोतांबहु
ल्पघनसेतुनिवारितानि॥जग्मुर्जलानिजलमंडुकवाद्यवल्गुवल्गद्घनस्तनतटस्खलितानिमं
दं॥२९॥आलोलपुष्करमुखोल्लसितैरभीक्ष्णमुक्षांबभूवुरभितोवपुरंबुवर्षैः॥खेदायतोधूसितवे
गनिरस्तमुग्धैर्महेभ्यैरत्ननिकरैरिवलोहितकानि॥३०॥येपक्षिणःप्रथममंबुनिधिंगतास्तेयेपीं
द्रपाणितुलितायुधलूनपक्षाः॥तेजग्मुरद्रिपतयःसरसीर्विगाढुमाक्षिप्तकेतुकुथसैन्यगजच्छलेन॥ ॥२५॥
॥३१॥आत्मानमेवजलधेःप्रतिबिंबितांगमूर्मौमहत्यभिमुखोपतितंनिरीक्ष्य॥क्रोधादधावपदं
॥२५॥ नारतिनूतनमिन्यनागाच्चियुक्तरवयुक्तमहोमहेलः॥३२॥नादातुमन्यकरिमुक्तमदांबुतिक्तंधूतं
धुरोननोविहातुमपीच्छतांनः॥रुद्धेगजेनसरितःसरुषावतारेरिक्तोदपात्रकरमास्तचिरंजनौ

प्रेरित४ मैनाकादयः४ तीरे तीर्थैः२ उत्तारिताः४ सुरक्तिर अवगाहितः२

विलासिभिः २ सत्वरं २ नसदेशे ३ द्विपानां २ ईक्षुः १ निर्विवृत्ति हर्तुमिच्छुः २
उष्णीः २ ग्रस्तं ३ मदांधो ४ जडैः अ क्रांतेसति ५ स्तोरे दंतयोर्मध्यभागे ४
प्रदेशः ५ पतितं ५

घः॥३३॥ पर्याणमाभ्युषितलुहीहिपुरःस्तनौते पश्यन्प्रतिद्विरदकुंभविशंकिचेताः॥ स्तंबेरमः परिणिनंसुर
सावुपैति खिंगैरगणघतंसत्वरमेवमेकः॥३४॥ कीर्णं शनैरनुकपोलमनेकपानां हस्तैर्विगाढमदताप
रुजः शमाय॥ आकर्णमुल्लसितमंबुविकाशिकाशनीकाशमापसमतां सितचामरस्य॥३५॥ गंडूष
मुज्झितवता पयसः सरोषं नागेन लब्धपरवारणमारुतेन॥ अंभोधिरोधसि पृथुप्रथिमानभागरुद्धो
रुदंतमुशलप्रसरैर्विसस्ते॥३६॥ दानं ददत्यपि जलैः सहसाधिरूढे को विद्यमानगतिरासितुमुत्स
हेत॥ यद्दंतिनः कटकटाहतटान्मिमंक्षोर्मंक्षूदपाति परितः पटलैरलीनां॥३७॥ अंतर्जलौघमवगा
ढवतः कपोलौ हित्वा क्षणं विततपक्षतिरंतरिक्षे॥ द्रव्याश्रयेष्वपि गुणेषु रराज नीलो वर्णः पृथग्ग
तइवालिगणो गजस्य॥३८॥ संसर्पिभिः पयसि गैरिकरेणुरागैरंभोजगर्भरजसांगविषंगिभिश्च॥ क्री
डोपभोगमनुभूय सरिन्महेभावन्योन्यवस्त्रपरिवर्तमिव व्यधत्तां॥३९॥ आचंद्रकैर्मदजलस्य महानदी
नां नेत्रश्रियं विकसतो विदधुर्गजेंद्राः॥ तोयप्रसवापुरविलंबितमुत्तरंतो धौतांगलग्ननवनीलपयोज

